# Shri BhArgavakavacham

# શ્રીભાર્ગવકવચમ્

## Document Information

Text title : bhArgavakavacham

File name : bhArgavakavacham.itx

Category : kavacha, vishhnu, vishnu_misc, vishnu

Location : doc_vishhnu

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, NA

Description-comments : From @@Bhagvan Parashuram@@ by Dr. Viracharya Shastri

Latest update : July 21, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીભાર્ગવકવચમ્

ગમ્ભીરો માહાત્મ્યાત્પ્રશમશુચિરત્યન્તસુજનઃ
પ્રસન્નઃ પુણ્યાનાં પ્રચય ઇવ સર્વસ્ય સુખદઃ ।
પ્રભુત્વસ્યોત્કર્ષાત્પરિણતિ વિશુદ્ધેશ્ચ તપસા -
મસૌ દૃષ્ટઃ સત્ત્વં પ્રબલયતિ પાપં ચ નુદતિ ॥
॥ શ્રી ગણેશાય નમઃ ॥

શ્રી નારાયણ ઉવાચ ।
કૈલાસશિખરે રમ્યે શઙ્કરં લોકશઙ્કરમ્ ।
કૈવલ્યચરણં ગૌરી પપ્રચ્છ હિતમદ્ભુતમ્ ॥ ૧॥

પાર્વત્યુવાચ ।
દેવદેવ મહાદેવ દેવેશ વૃષભધ્વજ ।
ત્વત્તઃ શ્રુતાન્યશેષાણિ જામદગ્ન્યસ્ય સામ્પ્રતમ્ ॥ ૨॥

હરેરંશાવતીર્ણસ્ય મન્ત્રયન્ત્રાદિકાન્યલમ્ ।
ન શ્રુતં કવચં દેવ ન ચોક્તં ભવતા મમ ॥ ૩॥

વક્તુમર્હસિ દેવેશ ભક્તાયૈ ગુહ્યમપ્યુત ।
ઇતિ પૃષ્ટઃ સ ગિરિશો મન્ત્રયન્ત્રાઙ્ગતત્ત્વવિત્ ॥ ૪॥

ઉવાચ પ્રહસન્દેવીં હિતાય જગતામિદમ્ ।
રહસ્યમપિ હિ બ્રૂયુર્લોકૈકહિતદૃષ્ટયઃ ॥ ૫॥

શિવ ઉવાચ ।
શ ૃણુ પ્રિયે પ્રિયમિદં મમ ગુહ્યતરં પરમ્ ।
ધર્માર્થકામમોક્ષાણામનાયાસં સુસિદ્ધિદમ્ ॥ ૬॥

એકમૌપયિકુ મન્યે વિષ્ણુવક્ષઃસ્થલાલયામ્ ।
શ્રિયમાક્રષ્ટુકામાનામિદં કવચમુત્તમમ્ ॥ ૭॥

એકાતપત્રસહિતાં ય ઇચ્છેત્સાગરામ્બરામ્ ।

સ જામદગ્ન્યકવચં નિત્યમાવર્તયેન્નરઃ ॥ ૮॥

ઉદ્દણ્ડશસ્ત્રદોર્દણ્ડ પ્રચણ્ડરિપુમણ્ડલમ્ ।
કથઞ્જયેયુર્વીરેન્દ્રાઃ કવચાનાવૃતાઙ્ગકાઃ ॥ ૯॥

પરપ્રયુક્ત કૃત્યાદિદોષો ભૂતાદયોઽપિ વા ।
પ્રયાન્તિ ભીતા રામસ્ય વર્મણા વિક્ષ્ય રક્ષિતમ્ ॥ ૧૦॥

કિમન્યૈઃ કવચૈર્દેવિ કિમન્યૈર્મનુભિશ્ચ વા ।
જામદગ્ન્યઃ પરં યસ્ય દૈવતં ભૃત્યવત્સલઃ ॥ ૧૧॥

કવચસ્યાસ્ય ગિરિજે ઋષ્યાદિન્યાસકલ્પનમ્ ।
મૂલમન્ત્રોક્તવિધિના કારયેત્સાધકોત્તમઃ ॥ ૧૨॥

અસ્ય શ્રીભાર્ગવકવાસ્તોત્રમન્ત્રસ્ય
અઙ્ગિરા ઋષિઃ, બૃહતીછન્દઃ, શ્રીમાન્જામદગ્ન્યો દેવતા,
શ્રીભાર્ગવરામપ્રીત્યર્થે ભાર્ગવકવચસ્તોત્રજપેવિનિયોગઃ ।
અથ કરન્યાસઃ ।
ૐ રાં રામાય નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રાં રામાય નમઃ તર્જનીભ્યાં નમઃ ।
ૐ રાં રામાય નમઃ મધ્યમાભ્યાં નમઃ ।
ૐ રાં રામાય નમઃ અનામિકાભ્યાં નમઃ ।
ૐ રાં રામાય નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ રાં રામાય નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
અથ ષડઙ્ગન્યાસઃ ।
ૐ ऱ◌ાં રામાય નમઃ હૃદયાય નમઃ ।
ૐ ऱ◌ાં રામાય નમઃ શિરસે સ્વાહા ।
ૐ ऱ◌ાં રામાય નમઃ શિખાયૈ વષટ્ ।
ૐ ऱ◌ાં રામાય નમઃ કવચાય હુમ્ ।
ૐ ऱ◌ાં રામાય નમઃ નેત્રત્રયાય વૌષટ્ ।
ૐ ऱ◌ાં રામાય નમઃ અસ્ત્રાય ફટ્ ।
અથ ધ્યાનમ્ ।
ઉદ્દોર્દણ્ડચલત્કુઠારશિખરસ્ફારસ્ફુ લિઙ્ગસ્ફુર
વ્રાતામોઘમહાસ્ત્રનાશિતજગદ્વિદ્વેષિવંશાટવીમ્ ।
વન્દે ભાર્ગવમુગ્રકાર્મુકધરં શાન્તં પ્રસન્નાનનમ્,

વીર શ્રીપરિચુમ્બ્યમાનમહિતસ્વબ્રહ્મતેજોનિધિમ્ ॥ ૧૩॥

ૐ જામદગ્ન્યઃ શિરઃ પાતુ પાતુ મૂર્ધાનમૂર્ધ્વદૃક્ ।
લલાટં લલિતઃ પાતુ ભ્રુવૌ ભૃત્યાર્તિનાશનઃ ॥ ૧૪॥

શ્રવસી સુશ્રવા મેઽવ્યાત્કર્ણૌ કર્ણાન્તલોચનઃ ।
નેત્રે ગોત્રાર્તિહા મેઽવ્યાલ્લોચને ભવમોચનઃ ॥ ૧૫॥

ગણ્ડે મે ખણ્ડપરશુઃ કપોલૌ પાતુ શીલવાન્ ।
નાસે સુનાસઃ પાયાન્મે નાસિકે દાસવત્સલઃ ॥ ૧૬॥

રસનાં રસરૂપોઽવ્યાદ્રસજ્ઞાં રેણુકાસુતઃ ।
અધરૌ પાતુ મે નિત્યમધરીકૃતશાત્રવઃ ॥ ૧૭॥

વક્ત્રં ચિત્રચરિત્રોઽવ્યાદ્દન્તાન્દન્તીન્દ્રવિક્રમઃ ।
ચુબુકં રિપુજિત્પાતુ ગ્રીવાં શ્રીવત્સલાઞ્છનઃ ॥ ૧૮॥

સ્કન્ધૌ મે સ્કન્દવિજયી કક્ષે મે ક્ષત્રિયાન્તકઃ ।
ભુજૌ મે સતતં પાતુ સહસ્રભુજશાસનઃ ॥ ૧૯॥

કરૌ હિતકરઃ પાતુ પાણી ક્ષોણી ભરાપહઃ ।
અઙ્ગુલીર્મઙ્ગલગુણો નખાનિ મખકૃન્મમ ॥ ૨૦॥

વક્ષઃ પાતુ મમાભીક્ષ્ણં ક્ષતજાભિષવપ્રિયઃ ।
ઉરઃ પુરુષવીરો મે પાર્શ્વૌ પાતુ પરશ્વધી ॥ ૨૧॥

ઉદરસ્થજગત્પાયાદુદરં મમ સર્વદા ।
ભયાપહોઽવ્યાન્નાભિં મે મધ્યં નિધ્યાતવિષ્ટપઃ ॥ ૨૨॥

લિઙ્ગં શઙ્કરશિષ્યોઽવ્યાદુપસ્થં નિસ્તુલપ્રભઃ ।
પાય્વપાનં ચ મે પાયાત્સાયકાસનવાન્સદા ॥ ૨૩॥

ત્રિઃ સપ્તકૃત્વઃ કુલહા ત્રિકં મેઽવતુ સર્વદા ।
પરમેષ્ઠ્યવતાત્પૃષ્ઠં પિઠરં દૃઢ વિક્રમઃ ॥ ૨૪॥

ઊરુ મેરુસમઃ પાતુ જાનૂ મે જગતાં પતિઃ ।
જઙ્ઘે સઙ્ઘાતહન્તાવ્યાત્પ્રપદે વિપદાન્તકઃ ॥ ૨૫॥

પાદૌ મે પાદચાર્યવ્યાચ્ચરણૌ કરણાનિધિઃ ।
પાદાઙ્ગુલીઃ પાપહા મે પાયાત્પાદતલે પરઃ ॥ ૨૬॥

પરશ્વધધરઃ પાયદ્રામઃ પાદનખાનિ મે ।
પૂર્વાભિભાષી માં પાયાત્પૂર્વસ્યાં દિશિ સન્તતમ્ ॥ ૨૭॥

દક્ષિણસ્યામપિ દિશિ દક્ષયજ્ઞાન્તક પ્રિયઃ ।
પશ્ચિમસ્યાં સદા પાયાત્પાશ્ચાત્યામ્બુધિમર્દનઃ ॥ ૨૮॥

વિત્તેશરક્ષિતાશાયાં પાયાન્માં સત્તમાર્ચિતઃ ।
સર્વતઃ સર્વજિત્પાયાન્મમાઙ્ગનિ ભયાત્પ્રભુઃ ॥ ૨૯॥

મનો મહેન્દ્રનિલયશ્ચિત્તં મે દૃપ્તનાશનઃ ।
બુદ્ધિં સિદ્ધાર્ચિતઃ પાયાદહન્તામનહઙ્કૃતિઃ ॥ ૩૦॥

કર્માણિ કાર્તવીર્યારિર્હેલાં હૈહયવંશહાઃ ।
હરત્વમોઘદૃઙ્ મોહં ક્રોધં ચ ક્રોધદર્પહા ॥ ૩૧॥

શ્રિયં કરોતુ મે શ્રીશઃ પુષ્ટિં મે પુષ્ટિવર્ધનઃ ।
સન્તાનં સતતં દદ્યાદ્ભૃગુસતાનભૂરુહઃ ॥ ૩૨॥

આયૂંષિ મે વિતનુતાદાર્યઃ પરમપૂરુષઃ ।
આશાં મે પૂરયત્વાશુ કશ્યપાર્પિતવિષ્ટપઃ ।
શ્રીમાન્પરશુરાયો માં પાતુ સર્વાત્મના સદા ૐ ॥ ૩૩॥

ઇત્યેતત્કવચં દિવ્યમભેદ્યં મન્ત્રયન્ત્રિભિઃ ।
કથિતં દેવિ તે ગુહ્યં પ્રિયેતિ પરમાદ્ભુતમ્ ॥ ૩૪॥

ન નાસ્તિકાય નાદાત્રે ન ચાશ્રદ્ધાલવે પ્રિયે ।
દેયાન્નાવિનીતાયૈતન્નાભક્તાય કદાચન ॥ ૩૫॥

નાજાપકાય નાજ્ઞાત્રે નાસત્યવચસે ક્વચિત્ ।
નામાલામન્ત્રિણે દેવિ પ્રદેયં નાપ્યમન્ત્રિણે ॥ ૩૬॥

દેયં શ્રદ્ધાલવે ભક્ત્યા પ્રણતાય નતાત્મને ।
ગુણાન્વિતાય શુદ્ધાય મન્ત્રગોપ્ત્રે ચ મન્ત્રિણે ॥ ૩૭॥

અવશ્યમેતજ્જપ્તવ્યં ત્રિસન્ધ્યં નિયમાન્વિતૈઃ ।
મન્ત્રાવસાને મન્ત્રજ્ઞૈ રચિતં મન્ત્રસિદ્ધયે ॥ ૩૮॥

વર્મૈતચ્ચ જપેન્મન્ત્રી જપેદ્વા સતતં મનુઃ ।
આસેચિતાદિવ તરોઃ ફલં નાપ્નોતિ સદ્રસમ્ ॥ ૩૯॥

જયકામો ભૂર્જપત્રે રક્તબિન્દુભિરુજ્જવલૈઃ ।

લિખિત્વાવર્તયેદ્રાત્રૌ કવચંશતસંખ્યયા ॥ ૪૦॥

સમ્પૂજ્ય ધૂપદીપાદ્યૈર્ધ્યાત્વા ચ હૃદિ ભાર્ગવમ્ ।
હસ્તે બધ્વા રણં ગત્વા વિજયશ્રિયમાપ્નુયાત્ ॥ ૪૧॥

એવં સમ્પ્રસ્થિતસ્યાસ્ય વિદ્યાવાદે રણેઽપિ વા ।
વાચસ્પતિર્વા શક્રો વા વશ્યઃ સ્યાત્કિમુતાપરે ॥ ૪૨॥

અથવા તિલકં કૃત્વા રક્તક્ષોદેન ભામિની ।
કવચેનાભિજપ્તેન ગચ્છન્જયમવાપ્નુયાત્ ॥ ૪૩॥

શ્રીકામસ્તુ મહેન્દ્રાદ્રેર્દ્રોણિં ગત્વા મનોહરામ્ ।
તત્ર મણ્ડલમાસ્થાય ચણ્ડભાનું વિલોકયન્ ॥ ૪૪॥

જપેદિદં મહદ્વર્મ પ્રત્યહં શતસંખ્યયા ।
મણ્ડલાન્તે શ્રિયં શ્રેષ્ઠા લભતે ભાર્ગવાજ્ઞયા ॥ ૪૫॥

સિદ્ધયો વિવિધાસ્તસ્ય દિવ્યજ્યોતિર્લતાલયઃ ।
સિધ્યન્તિ સિદ્ધવન્દ્યસ્ય કૃપયા વિસ્મયાવહાઃ ॥ ૪૬॥

ભૂતપ્રેતપિશાચશ્ચ રોગશ્ચ વિવિધાશુભાઃ ।
દુષ્ટા નૃપાસ્તસ્કરાશ્ચ વ્યાઘ્રસિંહગજાદયઃ ॥ ૪૭॥

શ્રીમદ્ભૃગુકુલોત્તંસદંશદંશિતમદ્વજે ।
દૃષ્ટ્વૈવ હિ પલાયન્તે મૃત્યું દૃષ્ટ્વૈવ હિ પ્રજાઃ ॥ ૪૮॥

જામદગ્ન્યસ્ય યો વાઞ્છેત્સાન્નિધ્યં યોગિદુર્લભમ્ ।
દારિદ્યદુઃખશમનં સંસારભયનાશનમ્ ॥ ૪૯॥

સ મહેન્દ્રસ્ય શિખરે સ્નાત્વોપસ્થાય ભાસ્કરમ્ ।
તન્મધ્યવર્તિનં શાન્તં જટામણ્ડલમણ્ડિતમ્ ॥ ૫૦॥

પરશ્વધધનુર્દણ્ડરાજિતાં સદ્ભયાન્વિતમ્ ।
અક્ષસૂત્રં સુવિભ્રાણં દક્ષિણેઽઙ્ગુલિપલ્લવે ॥ ૫૧॥

વામજાનુતલન્યસ્તવામપાણિ કુશેશયમ્ ।
ઉન્મજ્જજ્જ્વલં ગ્રીવમામીલિત વિલોચનમ્ ॥ ૫૨॥

સુપ્રસન્નમુખામ્ભોજં સુસ્મિતં પલ્લવાધરમ્ ।
સુન્દરં સુન્દરાપાઙ્ગં ભોગિભોગભુજદ્વયમ્ ॥ ૫૩॥

ભક્તાનુગ્રાહકં દેવં જામદગ્ન્યં જગત્પતિમ્ ।
ધ્યાયન્તમાત્મનાત્માનં ધ્યાયેત્પ્રણતવસ્તલમ્ ॥ ૫૪॥

અથ દ્વાદશભિઃ પુણ્યૈર્નામભિઃ પાપહારિભિઃ ।
જપતામિષ્ટદૈર્ભૃત્યપારિજાતં સમર્ચયેત્ ॥ ૫૫॥

જામદગ્ન્યો જનન્નેતા બ્રહ્મણ્યો બ્રહ્મવત્સલઃ ।
કીર્તવીર્યકુલોચ્છેત્તા ક્ષત્રવંશપ્રતાપનઃ ॥ ૫૬॥

વિશ્વજિદ્દીક્ષિતો રામઃ કશ્યપાશાસુરદ્રુમઃ ।
પરશ્વધધરઃ શાન્તો મહેન્દ્રકૃતકેતનઃ ॥ ૫૭॥

એતૈર્દ્વાદશભિર્દિવ્યૈર્ગોપ્યૈરભ્યર્ચ્ય નામભિઃ ।
ઉપતિષ્ઠેત્પુનર્ગુહ્યૈર્મુખ્યૈર્નામભિરીશ્વરમ્ ।
ક્ષિપ્રપ્રસાદજનનૈશ્ચતુર્વર્ગફલોદયૈઃ ॥ ૫૮॥

હન્ત તે સમ્પ્રવક્ષ્યામિ તાન્યપિ પ્રણતાસિ યત્ ।
ઇમાનિ ગૌરિ નામાનિ સુગોપ્યાનિ સતામપિ ॥ ૫૯॥

ॐ હંસસ્ત્રયીમયો ધાતા યોગીન્દ્રહૃદાલયઃ ।
ત્રિધામા ત્રિગુણાતીતસ્ત્રિમૂર્તિસ્ત્રિજગન્મયઃ ॥ ૬૦॥

નારાયણઃ પરં બ્રહ્મ પરં તત્ત્વં પરાત્પરઃ ।
ભાર્ગવો ધર્મચરણો ભર્ગરૂપઃ સતાં ગતિઃ ॥ ૬૧॥

ઇતિ ષોડશભિઃ સ્તુત્વા નામભિઋર્ષિપુઙ્ગવમ્ ।
સર્વાશિષાં પતિં દેવં સકલાભીષ્ટદાયકૈઃ ॥ ૬૨॥

આત્માનં વિન્યસેદઙ્ગેષ્વનેન કવચેન સઃ ।
મૃગીમુદ્રિકયા ધીમાન્વજ્રસારેણ સારવિત્ ॥ ૬૩॥

દશચારં પ્રતિદિનં માસમેકં સમાચરેત્ ।
સ્પપ્રે પશ્યતિ દેવેશં ભાર્ગવં ભૃગુનન્દનમ્ ॥ ૬૪॥

ચિન્તિતાર્થપ્રદં સૌમ્યં ચિન્તામણિમિવાપરમ્ ।
માસત્રયં તુ વિન્યસ્તે સાક્ષાત્પશ્યતિ જાપકઃ ॥ ૬૫॥

મનસઃ સમ્પ્રસાદેન લબ્ધ્વા વરમનુત્તમમ્ ।
અણિમાદિગુણૈર્યુક્તો બ્રહ્મલોકમવાપ્નુયાત્ ॥ ૬૬॥

અથવા યોગસિદ્ધિં યો ધાતુ સિદ્ધિં ચ વાચ્છતિ ।

કુરુક્ષેત્રે મહેન્દ્રે વા જપેદયુતમાત્મવાન્ ॥ ૬૭॥

સર્વાશ્ચૌષધયસ્તસ્ય ખેચરત્વાધિસિદ્ધિદાઃ ।
રસસિદ્ધિપ્રદાશ્ચાપિ સિધ્યન્ત્યસ્ય ન સંશયઃ ॥ ૬૮॥

મહેન્દ્રાદ્રિરિવ ક્ષેત્રં સિદ્ધિદં નાસ્તિ ભૂતલે ।
જામદગ્ન્ય ઇવાન્યોઽસ્તિ ન દેવો ભૃત્યવત્સલઃ ॥ ૬૯॥

પ્રસ્ફુરદ્રુણસૌવર્ણરાશીનાં જન્મભૂઃ પરઃ ।
તથેદમિવ વર્માન્યદ્ધર્માદિફલદં ન હિ ॥ ૭૦॥

કવચેઽસ્મિન્સકૃજ્જપ્તે મન્ત્રાવૃત્તિ સહસ્રજમ્ ।
ફલમાપ્નોત્યવિકલં તસ્માન્નિત્યં જપેન્નરઃ ॥ ૭૧॥

અમન્ત્રી વાપિ મન્ત્રી વા ભાર્ગવે ભક્તિમાન્નરઃ ।
જપેન્નિત્યમિદં વર્મ મન્ત્રસિદ્ધિમવાપ્નુયાત્ ॥ ૭૨॥

સારસ્વતમિદં દેવિ કવચં વાક્પ્રદં નૃણામ્॥

મૂકોઽપિ વાગ્મી ભવતિ જપન્નેતદ્ગુરુર્યથા ॥ ૭૩॥

નિત્યં પરશ્વધભૃતઃ કવચસ્યાસ્ય ધારણાત્ ।
સભાસુ વદતાં શ્રેષ્ઠો રાજ્ઞાં ભવતિ ચ પ્રિયઃ ॥ ૭૪॥

વૈદિકં તાન્ત્રિકં ચૈવ માન્ત્રિકં જ્ઞાનમુત્તમમ્ ।
કવચસ્યાસ્ય જાપી તુ બ્રહ્મજ્ઞાનં ચ વિન્દતિ ॥ ૭૫॥

ઇત્યેતદુક્તં કવચં મયા હૈહયવિદ્વિષઃ ।
ગોપનીયમિદં દેવિ મમાત્માસિ મણિર્યથા ॥ ૭૬॥

ધન્યં યશસ્યમાયુષ્યં શ્રીકરં પુષ્ટિવર્ધનમ્ ।
જપતાં કવચં નિત્યં સર્વસૌભાગ્યપૂરિતમ્ ॥ ૭૭॥

ઇતિ શ્રી વિષ્ણુયામલે ઉપરિભાગે જામદગ્ન્યદિવ્યાગ્જનસિદ્ધિ -
કલ્પે ત્રયસ્ત્રિંશત્પટલઃ ॥ શ્રી ભાર્ગવાર્પણમસ્તુ ॥

॥ ઇતિ શ્રીભાર્ગવકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by
Sivakumar Thyagarajan shivakumar24 at gmail.com
Text from "Bhagavan Parashuram" by Dr. Viracharya Shastri.

*Shri BhArgavakavacham*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*